# नलोपाख्यानं २

बृहदश्व उवाच ।

दमयन्ती तु तच्छ्रुत्वा वचो हंसस्य भारत ।

तदा प्रभृति न स्वस्था नलं प्रति बभूव सा ॥१ ॥

ततश्चिन्तापरा दीना विवर्णवदना कृशा ।

बभूव दमयन्ती तु निःश्वासपरमा तदा ॥२ ॥

ऊर्ध्वदृष्टिर्ध्यानपरा बभूवोन्मत्तदर्शना ।

न शय्यासनभोगेषु रतिं विन्दति कर्हिचित् ॥३ ॥

न नक्तं न दिवा शेते हा हेति वदती मुहुः ।

तामस्वस्थां तदाकारां सख्यस्ता जज्ञुरिङ्गितैः ॥४ ॥

ततो विदर्भपतये दमयन्त्याः सखीगणः ।

न्यवेदयत नस्वस्थां दमयन्तीं नरेश्वर ॥५ ॥

तच्छ्रुत्वा नृपतिर्भीमो दमयन्तीसखीगणात् ।

चिन्तयामास तत्कार्यं सुमहत्स्वां सुतां प्रति ॥६ ॥

स समीक्ष्य महीपालः स्वां सुतां प्राप्तयैवनाम् ।

अपश्यदात्मनः कार्यं दमयन्त्याः स्वयंवरम् ॥७ ॥

स संनिपातयामास महीपालान्विशां पते ।

अनुभूयतामयं वीराः स्वयंवर इति प्रभो ॥८ ॥

श्रुत्वा तु पार्थिवाः सर्वे दमयन्त्याः स्वयंवरम् ।

अभिजग्मुस्तदा भीमं राजानो भीमशासनात् ॥९ ॥

हस्त्यश्वरथघोषेण नादयन्तो वसुंधराम् ।

विचित्रमाल्याभरणैर्बलैर्दृश्यैः स्वलंकृतैः ॥१० ॥

एतस्मिन्नेव काले तु पुराणावृषिसत्तमौ ।

अटमानौ महात्मानाविन्द्रलोकमितो गतौ ॥११ ॥

नारदः पर्वतश्चैव महात्मानौ महाव्रतौ ।

देवराजस्य भवनं विविशाते सुपूजितौ ॥१२ ॥

तावर्चित्वा सहस्त्राक्षस्ततः कुशलमव्ययम् ।

पप्रच्छानामयं चापि तयोः सर्वगतं विभुः ॥१३ ॥

नारद उवाच ।

अवयोः कुशलं देव सर्वत्रगतमीश्वर ।

लोके च मघवन्कृत्स्ने नृपाः कुशलिनो विभो ॥१४ ॥

बृहदश्व उवाच ।

नारदस्य वचः श्रुत्वा पप्रच्छ बलवृत्रहा ।

धर्मज्ञाः पृथिवीपालास्त्यक्तजीवितयोधिनः ॥१५ ॥

शस्त्रेण निधनं काले ये गच्छन्त्यपराङ्मुखाः ।

अयं लोको ऽक्षयस्तेषां यथैव मम कामधुक् ॥१६ ॥

क्व नु ते क्षत्रियाः शूरा न हि पश्यामि तानहम् ।

अगच्छतो महीपालानतिथीन्दयितान्मम ॥१७ ॥

एवमुक्तस्तु शक्रेण नारदः प्रत्यभाषत ।

शृणु मे भगवन्येन न दृश्यन्ते महीक्षितः ॥१८ ॥

विदर्भराजदुहिता दमयन्तीति विश्रुता ।

रूपेण समतिक्रान्ता पृथिव्यां सर्वयोषितः ॥१९ ॥

तस्याः स्वयंवरः शक्र भविता नचिरादिव ।

तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः ॥२० ॥

तां रत्नभूतां लोकस्य प्रार्थयन्तो महीक्षितः ।

काङ्क्षन्ति स्म विशेषेण बलवृत्रनिषूदन ॥२१ ॥

एतस्मिन्कथयमाने तु लोकपालाश्च साग्निकाः ।

आजग्मुर्देवराजस्य समीपममरोत्तमाः ॥२२ ॥

ततस्तच्छुश्रुवुः सर्वे नारदस्य वचो महत् ।

श्रुत्वा चैवाब्रुवन्हृष्टा गच्छामो वयमप्युत ॥२३ ॥

ततः सर्वे महाराज सगणाः सहवाहनाः ।

विदर्भानभितो जग्मुर्यत्र सर्वे महीक्षितः ॥२४ ॥

नलो ऽपि राजा कौन्तेय श्रुत्वा राज्ञां समागमम् ।

अभ्यगच्छददीनात्मा दमयन्तीमनुव्रतः ॥२५ ॥

अथ देवाः पथि नलं ददृशुर्भूतले स्थितम् ।

साक्षादिव स्थितं मूर्त्या मन्मथं रूपसंपदा ॥२६ ॥

तं दृष्ट्वा लोकपालास्ते भ्राजमानं यथा रविम् ।

तस्थुर विगतसंकल्पा विस्मिता रूपसंपदा ॥२७ ॥

ततो ऽन्तरिक्षे विष्टभ्य विमानानि दिवौकसः ।

अब्रुवन्नैषधं राजन्नवतीर्य नभस्तलात् ॥२८ ॥

भो भो नैषध राजेन्द्र नल सत्यव्रतो भवान् ।

अस्माकं कुरु साहाय्यं दूतो भव नरोत्तम ॥२९ ॥